# संस्कृत-वार्ता:

**दिनाङ्क :-22.06.2024**

**प्रात: - 06:55**

**अथ वार्ता:**

**वस्तुसेवाकर-वित्तमन्त्री**

वस्तु-सेवा-कर-परिषदा सारलौह-लौह-स्फटयातु-इत्यादिभि: निर्मित-दुग्ध-सम्पुटेषु सामान्यतया द्वादशप्रतिशतं वस्तुसेवाकरस्य अनुशंसा कृतास्ति। वित्तमन्त्री निर्मला-सीतारामन: ह्य: नवदिल्ल्यां वस्तु-सेवा-कर-परिषद: त्रिपञ्चाशत्तमस्य उपवेशनस्य अनन्तरं वार्ताहरै: सह वार्तालापानन्तरं घोषणां कृतवती यत् अखिलभारतस्तरे जीवमितीय-प्रमाणीकरणं समारभते। वित्तमन्त्री प्रोक्तवती यत् भारतीय-रेलवेद्वारा यात्रिभ्य: प्रदीयमानानि अनेकानि सौविध्यानि वस्तुसेवाकर-सीम्न: निर्गतानि।

**भारत-बाङ्गलादेश**

भारत-बाङ्गलादेशाभ्यां अनेकेषु सन्धिज्ञापनपत्रेषु हस्ताक्षरं कृतम्। एतेषु सन्धिपत्रेषु आँकिक-हरित-अंशभागिता, समुद्र-सहकारिता, स्वास्थ्य-चिकित्सा, अन्तरिक्ष-सहभागिता, रेलमार्ग-संपर्कः, समुद्र-विज्ञानम्, आपद्-प्रबन्धनम्, मत्स्यपालनम् च इति क्षेत्राणि सम्मिलितानि सन्ति। नवदिल्लीनगरे प्रधानमन्त्रिण: नरेन्द्रमोदिनः बाङ्गलादेशप्रधानमन्त्रिणः शेख-हसीनायाश्च वार्तालापानन्तरं एतानि सन्धिपत्राणि हस्ताक्षरितानि। एकस्यां वार्ताहरविज्ञप्त्यां प्रधानमन्त्री मोदी उक्तवान् यत् बाङ्गलादेशः भारतस्य नेबर फर्स्ट् एक्ट् ईस्ट इति नीतेः आधारस्तम्भ: अस्ति। सः अवदत् यत् गते एकस्मिन्वर्षे उभाभ्याम् देशाभ्यां मिलित्वा जनकल्याणस्य कृते बहव्य: महत्त्वपूर्णाः परियोजनाः सम्पन्नाः।

-

**एन. टी. ए. समिति**

राष्ट्रीय-परीक्षा-अभिकरणेन एन. टी. ए. इत्यनेन आयोज्यमाणानां परीक्षाणां पारदर्शितया सुगमतया निष्पक्षतया संचालनं सुनिश्चिकर्तुं शिक्षा-मंत्रालयेन एकस्य उच्चस्तरीयसमितेः निर्माणं कृतम्। भारतीय-अन्तरिक्षानुसंधान संघटनस्य इसरो इत्यस्य पूर्वप्रमुखस्य के. राधाकृष्णनः अध्यक्षतायुतायै सप्त-सदस्यात्मिकायै समितये परीक्षा-प्रक्रियायां परिष्काराय अथ च कार्यप्रणालीं समीक्षितुं दायित्वं दत्तम्। एषा समिति: प्रवर्तमानप्रक्रियाया: मूल्याङ्कनं अपि च अभिशङ्कानिवारणतन्त्रस्य समाकलनं करिष्यति। समितये मासद्वये एव प्रतिवेदनप्रदानाय कथितम्। समिते: निर्माणानन्तरं केन्द्रीयशिक्षामन्त्री धर्मेन्द्रप्रधान: निगदितवान् यत् छात्राणां कल्याणं उज्ज्वल-भविष्यं च प्रशासनस्य सर्वोच्चप्राथमिकता भविष्यति।

**संसद् सत्र**

अष्टादश-लोकसभाया: प्रथमं सत्रं श्व: समारप्स्यते। अस्मिन् सत्रे, नवनिर्वाचितानां संसत्-सदस्यानां शपथ-ग्रहणं भविष्यति। भाजपेति दलस्य वरिष्ठ: सांसद: भर्तृहरि महताब: यो हि नवलोकसभाया: प्रोटेम स्पीकर अर्थात् अस्थायि अध्यक्ष रूपेण कार्यं करिष्यति, स: नवनिर्वाचितानां संसद्-सदस्यानां कृते शपथ-ग्रहणं कारयिष्यति। लोकसभाध्यक्षस्य निर्वाचनं जून मासस्य षड्विंशे दिनांके भविष्यति; तदनु सप्तविंशे दिनांके राष्ट्रपतिपदासीना द्रौपदीमुर्मु: उभयो: सदनयो: संयुक्तोपवेशनं सम्बोधयिष्यति। ध्येयं वर्तते यत् राज्यसभाया: सत्रं जूनमासस्य सप्तविंशे दिनांके समारप्स्यते। सत्रस्यावसानं जुलाईमासस्य तृतीयदिनांके निर्धारितं अस्ति।

**क्रिकेट**

आई.सी.सी. इत्यस्यां पुरुषाणां विंशति: प्रतिविंशति: विश्व-चषक-क्रिकेट-प्रतिस्पर्धायां भारतीयदलेन एण्टीगुआयां गतरात्रौ सर-विवियन-रिचर्ड्स-क्रीडांगणे बांग्लादेशदलं पञ्चाशत्-धावनांकै पराजितम्। पणकं विजित्य बांग्लादेशदलेन कन्दुकक्षेपणं स्वीकृतम्। अनेन विजयेन सह भारतीयदलं प्रतिस्पर्धायै अस्यै उपान्त्यचक्रकद्वन्द्वाय चितम् तत्रैव बांग्लादेश: बहिर्गत:। आगामि-सप्ताहे गुयानायां भारतीयदलस्य प्रतिस्पर्धा भविष्यति।

**।।इति वार्ता:।।**